श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५०

*वत्सासुरवधवर्णनम् बकासुरवधवर्णनं च*

तरळमधुकृद्वृन्दे वृन्दावनेऽथ मनोहरे
    पशुपशिशुभिः साकं वत्सानुपालनलोलुपः।
हलधरसखो देव श्रीमन् विचेरिथ धारयन्
    गवळमुरळीवेत्रं नेत्राभिरामतनुद्युतिः॥ १ ॥

विहितजगतीरक्षं लक्ष्मीकराम्बुजलाळितं
    ददति चरणद्वन्द्वं वृन्दावने त्वयि पावने।
किमिव न बभौ सम्पत्सम्पूरितं तरुवल्लरी-
    सलिलधरणीगोत्रक्षेत्रादिकं कमलापते॥ २ ॥

विलसदुलपे कान्तारान्ते समीरणशीतळे
    विपुलयमुनातीरे गोवर्धनाचलमूर्धसु।
ललितमुरळीनादः सञ्चारयन् खलु वात्सकं
    क्वचन दिवसे दैत्यं वत्साकृतिं त्वमुदैक्षथाः॥ ३ ॥

रभसविलसत्पुच्छं विच्छायतोऽस्य विलोकयन्
    किमपि वलितस्कन्धं रन्ध्रप्रतीक्षमुदीक्षितम्।
तमथ चरणे बिभ्रद्विभ्रामयन् मुहुरुच्चकैः
    कुहचन महावृक्षे चिक्षेपिथ क्षतजीवितम्॥ ४ ॥

निपतति महादैत्ये जात्या दुरात्मनि तत्क्षणं
    निपतनजवक्षुण्णक्षोणीरुहक्षतकानने।
दिवि परिमिळद्वृन्दा वृन्दारकाः कुसुमोत्करैः
    शिरसि भवतो हर्षाद्वर्षन्ति नाम तदा हरे॥ ५ ॥

सुरभिलतमा मूर्धन्यूर्ध्वं कुतः कुसुमावली
    निपतति तवेत्युक्तो बालैः सहेलमुदैरयः।
झटिति दनुजक्षेपेणोर्ध्वं गतस्तरुमण्डलात्
    कुसुमनिकरः सोऽयं नूनं समेति शनैरिति॥ ६ ॥

क्वचन दिवसे भूयो भूयस्तरे परुषातपे
    तपनतनयापाथः पातुं गता भवदादयः।
चलितगरुतं प्रेक्षामासुर्बकं खलु विस्मृतं
    क्षितिधरगरुच्छेदे कैलासशैलमिवापरम्॥ ७ ॥

पिबति सलिलं गोपव्राते भवन्तमभिद्रुतः
    स किल निगिलन्नग्निप्रख्यं पुनर्द्रुतमुद्वमन्।
दलयितुमगात् त्रोट्याः कोट्या तदाऽऽशु भवान् विभो
    खलजनभिदाचुञ्चुश्चुञ्चू प्रगृह्य ददार तम्॥ ८ ॥

सपदि सहजां सन्द्रष्टुं वा मृतां खलु पूतना-
    मनुजमघमप्यग्रे गत्वा प्रतीक्षितुमेव वा।
शमननिलयं याते तस्मिन् बके सुमनोगणे
    किरति सुमनोवृन्दं वृन्दावनात् गृहमैयथाः॥ ९ ॥

ललितमुरलीनादं दूरान्निशम्य वधूजनै-
    स्त्वरितमुपगम्यारादारूढमोदमुदीक्षितः।
जनितजननीनन्दानन्दः समीरणमन्दिर-
    प्रथितवसते शौरे दूरीकुरुष्व ममामयान्॥ १० ॥

**********